
ISSN 0975-4067

# KIRAṆĀVALĪ

## Journal of Sanskrit Research Foundation

The New Trivandrum Sanskrit Series
Vol.XV.Book.I-IV

January - December 2023



किरणावली

SRFT
Sanskrit Research Foundation
Thiruvananthapuram

Pūrva Mīmāṃsa Vs Śaṅkara's Advaita – A Reading of Śaṅkara's Gītā Upasaṃhāra Bhāṣya — Vishnupriya Srinivasan — 177
Does Jaina Epistemology Indicate a Many-Valued Logic — Dr. Sabeena P S — 185
जगन्मिथ्यात्वस्य चित्सुखप्रतिपादितं लक्षणम् — डा. सन्तोष् .सि.आर् — 193
महाभारते सूचिताः जीविकाः – एकमध्ययनम् — डा.के.रतीशः — 199
अध्यासस्वरूपविचारः शारीरकमीमांसायां सिद्धान्तबिन्दौ च आशङ्कितविरोधपरिहारश्च — डा. अजिकुमार् पि. वि — 203
व्युत्पत्तिवादोक्तदिशा कर्माख्यातार्थविचारः — डा.अजिमोन् सी.एस् — 209
शब्दार्थचित्रविनिर्माणे श्रीहर्षस्य कृतित्वम् — ड. साधन-कुमार-पात्रः — 213
चट्टम्बिस्वामिनः दर्शने वेदान्तयोगदर्शनयोः समन्वयः — डा. आनन्द् .एस् , डा.मिधुन्. पि — 219
वैशेषिकदर्शने सन्निकर्षविचारः — डा.एस्. शिवकुमारः — 225
धर्मशास्त्रदिशा शिक्षायां संस्कृतेः मुख्याङ्गत्वविमर्शः — डा. श्रीजित् टि.जि — 230
श्री-अरविन्दस्य अद्वैतवेदान्ततत्त्वानुशीलनम् — डॉ. लक्ष्मीकान्तषडङ्गी — 234
सद्योवर्षणम् — डा.ईश्वरः — 238
विविधशास्त्रेषु प्रतिपादितस्य गुणतत्त्वस्य पर्यालोचनम् — रिया दत्ता — 244
काव्यकारणविमर्शः — डा. कृष्णगोपाल पात्रः — 251
मनुसंहितायां प्रतिफलितं सांख्यतत्त्वम् — लाल्टु रुइदास — 257
पुरुषार्थानामुत्सनिरूपणम् — डा. वाणेश्वरजाना — 262
आत्मस्वरूपम् – कठोपनिषदि श्रीमद्भगवद्गीतायां च — डा. बिन्दुश्री. के. एस् — 269
स्वामिविवेकानन्दस्य जीवनमधिकृत्य प्रणीताधुनिकसंस्कृतकाव्यत्रयेषु सामाजिकमूल्यबोधः — डाँ.सुनीतावर्मन — 272
मुख्योपनिषत्सु कर्मविचारः — मोलि एम् — 278
रामरायकवेः अद्वैतान्यमतखण्डने जीवेश्वरस्वरूपविमर्शः — विजिता विजयन्. ए — 281
वैदिकपरम्परासंरक्षणे श्रीमदनान्दतीर्थभगवत्पादाचार्याणां परमोच्चस्थानत्वम् — डॉ गुरूमध्वाचार्य तिरूमलाचार्य नवली — 284
Concept of Ātman in Ayurveda and Tarkaśāstra — Dr. Devan E. M — 287
Submission & Subscription — 292

# *पुरुषार्थानामुत्सनिरूपणम्*

**डा. वाणेश्वरजाना**[1]

**विषयसार:**

प्राणिभि: परिपूर्णमिदं जगत् ।तत्र तेषु मनुष्य: श्रेष्ठ:। परमब्रह्मणा विनिर्मिते अस्मिन् विश्वे मनुष्याणां भिन्नत्वस्य कारणमपि भगवता निर्धारितम्। पुरुषार्थ: खलु वुद्धिमतां मनुष्याणां भिन्नत्वकारणम्। अयं पुरुषार्थश्चतुर्विध: धर्मार्थकाममोक्षभेदेन। तत्र धर्म: खलु धारक:। जगत: धारक:। वस्तुत: धर्मो नियमस्य नामान्तरमेव। अर्थपदेन जागतिकविषया बोध्यन्ते। जगत: यानि कान्यपि प्रयोजनसाधकानि, तान्यर्थपदवाच्यानि। प्रवृत्तिमूलकपुरुषार्थ: काम:। कामवशादेव जगन्निर्माणम्। एवञ्चान्तिमे एतेषां त्रयाणां य: फलभूत:, स खलु परमपुरुषार्थ: मोक्ष:। परन्तु कुत्रायं पुरुषार्थ: निहितोऽस्ति ? वेदादीनि शास्त्राणि पुरुषार्थानामुत्सस्वरूपाणि। वेदे यद्यपि पुरुषार्थानां बीजं निहितमासीत्, परन्तु तस्य बीजस्य विकाश: परवर्तिकालेऽभवत्, येषां वर्णनमस्मिन् प्रबन्धे संक्षेपेण यथामत्युपस्थाप्यते।

**मूलपदानि**- *पुरुषार्थ:, धर्म:, अर्थ:, काम:, मोक्ष: इत्यादीनि।*

अखिलवैचित्र्यात्मके विश्वेऽस्मिन् मनुष्या: खलु विचारबुद्धिशीलजीवा:। तेषु पुन: वयं भारतीया: सर्वदा आध्यात्मवादस्य प्रत्ययिन:। अतो विचारशीलानामस्माकं भारतीयानां जीवने पुरुषार्थानां प्रभूतं गुरुत्वमस्ति। मानवजीवनस्य सार्विकविकाश: पुरुषार्थाद् भवति इति सर्वै: मन्यते। अतो भारतीयमनीषायां पुरुषार्थो हि चरमप्रतिपाद्यरूपेण विवेचित:। तस्मादस्माकं विविधशास्त्रादिषु साहित्यादिषु च ग्रन्थेषु पुरुषार्थलाभ एव हि मूललक्ष्यरूपेण निर्धारित:। पुरुषार्थोऽस्माकं जागतिकेन कर्मणा सह पारलौकिककर्मणां योगसाधनं करोति। कर्मानुसारं फलं भुङ्क्ते मनुष्य:। अतो जन्मन: परं जगति यस्य यद्दृशं कर्म, तदनुसारं स फलं लभते। पुरुषार्थ: स एव विषय:, य: पुरुषं सम्यक् कर्मद्वारा मृत्यो: परं सम्यक्क्षेत्रे प्रेरयति। धर्मलाभद्वारा तथा तदनुसारमर्थकामयो: लाभेन मोक्ष: प्राप्यते नरै:, एवञ्च प्रारब्धकर्मणां क्षये यदा ते परलोकं गच्छन्ति,तदा परमात्मना सह सायुज्यं लभन्ते।

साधारणव्युत्पत्त्या पुरुषाणामर्थ: खलु पुरुषार्थ इति षष्ठीतत्पुरुषसमासेन पदमिदं सिद्धम्। अर्थ्यते यत्तत् इति विग्रहे (अर्थ+घञ्) अर्थशब्दो निष्पन्न:। अत्र अर्थशब्द: प्रयोजनार्थक:। अमरकोषे उक्तम्- "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु (अमर.पृ.२१९)।" अत: पुरुषस्य प्रयोजनं हि पुरुषार्थ: (श.क.द्रु.भाग ३.पृ.१९६।)। पुरुषाणामर्थ: पुरुषार्थ:, अथवा पुरुषै: अर्थ्यते प्रार्थ्यते इति पुरुषार्थ:। अस्माकं वेदोपनिषदादि-प्राचीनशास्त्रेषु तथा तत्परवर्तिसंस्कृतवाङ्मयेषु चत्वार: पुरुषार्था: स्वीकृता:। धार्मार्थकाममोक्षा:। अस्माकं भारतीयसंस्कृतौ सर्वविषयाणां

1. सहकारि-अध्यापक:, संस्कृतविभाग:, गडवेता-महाविद्यालय:, गडवेता, पश्चिममेदिनीपुरम्, Email- bapansaskrit@gmail.com mob- 8159868097